दैनिकम् ई-संस्कृतवार्तापत्रम्
# हिमसंस्कृतवार्ता

पञ्चाङ्गम्
अद्य सिद्धार्थी वि.सं. २०८२,
कलियुगाब्धः ५१२७ बसन्त-ऋतुः
सूर्यः उत्तरायणम् चैत्रकृष्णसप्तमी
फाल्गुण 26 प्रविष्ठांशः मङ्गलमयः भवेत्

■ पृष्ठ-4 ■ वर्ष-5 ■ अङ्क-138 | 1 | मार्च 10, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

2 आयुष्मान भारत योजना, आरोग्य मंदिर योजना माध्यमेन समग्र राष्ट्रस्य ग्राम्य-क्षेत्रेषु स्वास्थ्यसेवानां विस्तारो विधीयते- प्रधानमन्त्री

3 विधानसभा-निर्वाचनेषु कः प्राप्स्यति काङ्ग्रेस-दलस्य 'नामपत्रम्'; मुख्यमन्त्री सुक्खूः कृतवान् रहस्योद्घाटनम्

4 कुमारभास्करवर्मसंस्कृतपुरातनाध्ययन-विश्वविद्यालये नूतने "सम-उपाचार्या" पदे आचार्यमल्लिकाकलितायाः नियुक्तिः सर्वैः विभागैः अभिनन्दनम्"

## प्रवर्तमानः संघर्षः भारताय अपि विशेष चिन्तायाः विषयः अस्ति - विदेशमन्त्री



हिमसंस्कृतवार्ताः - विदेशमन्त्री डॉ. एस. जयशंकरः सबलं प्रत्यपादयत् यत् पश्चिमैशिया-क्षेत्रे आपीडं न्यूनीकर्तुं मन्त्रणा कूटनीतिश्च समवलम्बनीया। पश्चिम-एशिया-क्षेत्रस्य स्थिति-विषये अवर-सदने प्रदत्ते स्वीये वक्तव्ये डॉ. एस. जयशंकर प्रावोचत् यत् भारत-सर्वकारेण गत-मासस्य विंशे दिनाङ्के तत्रत्य-स्थिति-विषये एकं वक्तव्यं प्रकाशितं, यस्मिन् गभीर चिन्ता व्यक्तीकृता अस्ति। साकमेव तत्र आपीड-प्रसङ्गे सम्बद्धाः सर्वेऽपि पक्षाः संयमं सन्धारयितुम् अध्यर्थिताः सन्ति। तेनोक्तं यत् भारतस्य मतम् अस्ति यत् आपीडस्य न्यूनीकरणार्थं मिथो मन्त्रणायाः कूटनीतेश्च च आश्रयः आश्रयणीयः। विदेशमन्त्री न्यगादीत् यत् एषः प्रवर्तमानः संघर्षः भारताय अपि विशेष चिन्तायाः विषयः अस्ति, यतोहि भारतमपि समीपस्थ-क्षेत्रे स्थितम् अस्ति। असौ उदैरयत् यत् विदेश मन्त्रालयेन स्थितेः परीक्षणार्थं प्रश्नानाम् उत्तरार्थं च विशेषः नियन्त्रण कक्षः स्थाप्यते। तेन एतदपि प्रोक्तं यत् ह्यस्तन-पर्यन्तं प्रायः सप्त-षष्टि-सहस्र-परिमिताः भारतीय नागरिकाः देशे प्रत्यागताः सन्ति। अमुना वक्तव्यमिदं विपक्षस्य तुमुल-कोलाहल मध्ये प्रदत्तं। ध्येमस्ति यद् इमे विपक्ष-जनाः एतस्मिन् प्रकरणे चर्चायाः याचनां कुर्वन्तः अवर्तन्त। डॉ. जयशंकरः राज्यसभायाम् अपि एतदेव वक्तव्यं दत्तवान्।

### पश्चिम-एशिया-क्षेत्रस्य आपीड-स्थिति-विषये चर्चा-याचकानां विपक्ष-सदस्यानां तुमुल कोलाहलस्य मध्ये लोकसभायाः स्थगनम्।

पश्चिम-एशिया-क्षेत्रस्य आपीड-स्थिति-विषये चर्चा-याचकानां विपक्ष-सदस्यानां तुमुल कोलाहलस्य मध्ये लोकसभा त्रि-वादनं यावत् स्थगितं जातम्। प्रथमं स्थगनानन्तरम्, यदा सदनं आरब्धम्, तदा विदेशमन्त्री डॉ. एस. जयशंकरः पश्चिम-एशिया-क्षेत्रस्य स्थिति-विषये स्वतः संज्ञानं स्वीकृत्य वक्तव्यं दत्तवान्। तेन यदैव वक्तव्यं आरब्धं तदैव कांग्रेस, डी.एम.के., सपा चेत्यादिभिः सहिताः अन्य-विपक्ष-दलानां सदस्याः लिखित-प्रदर्शन-फलकानि गृहीत्वा मध्ये-सदनम् प्रविष्टवन्तः। पीठासीनाधिकारी जगदंबिका पालः तान् निरदिशत् यत् लिखित-प्रदर्शन-फलकानां प्रदर्शनं सदनस्य नियमावल्याः विरुद्धम् अस्ति। संसदीय कार्य मन्त्री किरेन रिजिजूः सदनस्य मध्ये विपक्षस्य व्यवहारस्य भृशं भर्त्सनां आलोचनां च कुर्वन् प्रावोचत् यत् अमुना नैजे जीवनकाले एतावान् दायित्वहीनः विपक्षः कदापि नैव लोकितः। अध्यक्षेण कृतेऽपि अनुरोधे, विपक्षः निरन्तरं विरोधप्रदर्शनं कृतवान्, येन कारणेन सदनम् स्थगितं कृतम्।

## अमेरिका-इज़राइल-देशाभ्यां आक्रमणानन्तरं तैलमूल्यानि वर्धमानानि



हिमसंस्कृतवार्ताः - ईरानस्य भूम्यन्तर्वर्ति-आधारिक-प्रक्षेप्यास्त्र-संचना-क्षेत्रे अमेरिका-इज़राइल-देशाभ्यां आक्रमणानन्तरं पश्चिमैशिया-क्षेत्रे संघर्षः तीव्रतरः जातः, ईरानेन अपि खाति-क्षेत्रे प्रक्षेप्यास्त्रैः ड्रोनास्त्रैश्च कृतानि आक्रमणानि। शिला-तैलेन्धनस्य मूल्यं वर्ष-चतुष्के ऐदम्प्राथम्येन प्रतिबैरलम् शत-डॉलर मूल्यमपि अतिक्रान्तम्, सेंसेक्स इति अंशधन-विपणि-सूचकाङ्कः अपि सप्त-शतोत्तर-एक-सहस्र-मिताद् अङ्कादप्यधिकतया अपचितः जातः। निफ्टी समवायः अपि प्रारम्भिके व्यापारे पञ्च-शत-मिताद् अङ्कादपि नीचैः पतितः। इरान् युद्धेन मध्यपूर्वदेशे उत्पादनं, नौवहनं च बाधितं जायते येन तैलमूल्यानि वर्धमानानि सन्ति।

## मुद्रास्फीति नियन्त्रणार्थं राजकोषीय व्यापार-नीतयः

### प्रशासनिक-उपायाश्च क्रियन्ते- वित्तमन्त्री।

हिमसंस्कृतवार्ताः - मुद्रास्फीति-नियन्त्रण-प्रसङ्गे लोकसभायाम् वित्तमन्त्री निर्मला सीतारमन वर्या लिखितोत्तर-पत्रे उक्तवती यत् मुद्रास्फीति नियन्त्रणार्थं राजकोषीय व्यापार-नीतयः प्रशासनिक-उपायाश्च क्रियन्ते। तया एतदपि अपि निर्दिष्टम् यत् वैश्विक अपरिष्कृत-तैल-मूल्यवृद्धिः, मध्यम-कालिक-मुद्रास्फीतेः विनिमय-दरे उच्चावचता च वैश्विक-याञ्चायां आपूर्ति-स्थितौ, मौद्रिक नीतिप्रवर्तने च अप्रत्यक्ष-प्रभाव-सहितेषु नैकेषु कारकेषु निर्भरति। भारतीय-रिजर्व बैंकस्य मौद्रिक नीति-प्रतिवेदनम् अनुसृत्य, अपरिष्कृत-तैलेन्धन-मूल्यानि आधारभूत-पूर्वानुमानेभ्यः प्रतिशतं दशाधिकानि सन्ति, येन दैशिक-मूल्ये पूर्ण-प्रभावः निधीयते, एवं भवति चेत् मुद्रास्फीतिः त्रिंशत् आधार-अङ्कः वर्धितुं शक्नोति।

## प्रधानमन्त्री-उज्वला योजनान्तर्गतं निर्धनपरिवाराणां महिलानां कृते सार्धदशकोट्यधिक- एल. पी. जीति वात्यन्धन-सम्पर्क प्रदत्तम्




हिमसंस्कृतवार्ताः - सर्वकारेण अद्यावधि प्रधानमन्त्री-उज्वला योजनान्तर्गतं निर्धन परिवाराणां महिलानां कृते सार्धदशकोट्यधिक- एल. पी. जीति वात्यन्धन-सम्पर्क प्रदत्तमस्ति। योजनेयं षोडशोत्तरद्विशततमवर्षस्य मई-मासे आरब्धा, यस्योद्देश्यं सम्पूर्ण देशे महिलाभ्यः निक्षेपमूल्यरहितं एल पी जीति वात्यन्धन-सम्पर्क प्रदानाय आसीत्। पेट्रोलियम-प्राकृतिकवात्यन्धन-राज्यमन्त्री सुरेशगोपीत्येषः राज्यसभायां एकस्य प्रश्नस्य लिखितोत्तरे उक्तवान्। सः अवदत् यत्, अस्याः योजनायाः परिणामेन पारम्परिक-पाकपद्धतीनां परिवर्तनं जातम्, यासु जनाः इतः पूर्वं काष्ठ-गोमयेन्धन-सस्यावशिष्टादीनि घन-इन्धनानि प्रज्वालयन्ति स्म।

## सुभाषितम्

**भोगी भवति दानेन,**
**मेधावी वृद्धसेवया।**
**अहिंसया च दीर्घायुः**
**इतिति प्राहुर्मनीषिणः।।**

विद्वान तथा मनीषी जनों का कथन है कि दान करना ही संपत्ति का भोग करने का सर्वोत्तम रूप है। वरिष्ठ जनों की सेवा के द्वारा व्यक्ति बुद्धिमान् हो जाता है और अहिंसा का अनुपालन करने दीर्घायु प्राप्त करता है।




सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुद्धीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति

कार्यालयः
हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य समुखे
कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवहारसङ्केतः-१७७१११
सङ्केतः- प्रबन्धनिदेशिका- शिवानी शर्मा हिमसंस्कृतम्

## विकसित भारत-युवा-सम्पर्क-कार्यक्रमस्य द्वितीय-चरणस्य शुभारम्भः




हिमसंस्कृतवार्ताः - युव-कार्य-खेल-मन्त्रालयेन दिल्ल्यां विकसित भारत-युवा-सम्पर्क-कार्यक्रमस्य द्वितीय-चरणस्य शुभारम्भः कृतः। एषः उपक्रमः 'मम युवा भारतम्' इत्यस्य माध्यमेन आयोज्यते, यस्य उद्देश्यः विकसित-भारतस्य दृशा सह युवजनानां सहभागितायाः सुदृढीकरणम् अस्ति। मन्त्रालयेन प्रोक्तं यत् राष्ट्रीय राजधान्याः पञ्च-त्रिंशदधिकानां महाविद्यालयानां दश-सहस्राधिकाः छात्राः एतस्मिन् कार्यक्रमे भागं भजन्ते। कार्यक्रमे पंजीकरणं सहभागितां च "माई भारत डिजिटल प्लेटफॉर्म" mybharat.gov.in इत्यस्य माध्यमेन सुगमीकरिष्यते।

# राज्यस्य सम्पत्तिषु संसाधनेषु च मित्राणाम् आधिपत्यं स्थापितम्- जयरामठाकुरः प्रदेशसर्वकारं प्रति प्रहारं कृतवान्



**हिमसंस्कृतवार्ताः- शिमला।** विपक्षनेता जयरामठाकुरः पत्रकारसम्मेलनं सम्बोधयन् अवदत् यत् हिमाचलप्रदेशस्य कांग्रेससर्वकारः अधुना अत्यधिक- अस्थिरतायाः भयस्य च वातावरणे कार्यं कुर्वती अस्ति। प्रदेशे कांग्रेसपक्षस्य पूर्णबहुमतं सति अपि सर्वकारस्य अन्तः यथा अस्त-व्यस्तता असमञ्जसस्य च स्थितिः दृश्यते, तेन स्पष्टं भवति यत् सर्वकारस्य अन्तरे एव विश्वासस्य संकटं गभीरं जातम्। सः अवदत् यत् कांग्रेसपक्षस्य अन्तः एतादृशी अस्थिरता अस्ति यत् स्वपक्षस्य नेतारः अपि शङ्किताः सन्ति यत् कदा का स्थिति उत्पद्येत।

## 'मुख्यमन्त्री स्वान् सहयोगिनः मित्राणि च भ्रमितवान्

जयरामठाकुरः अवदत् यत् भारतीयजनतापक्षेण सैद्धान्तिकनिर्णयं स्वीकृत्य राज्यसभानिर्वाचने स्वप्रत्याशी न स्थापितः, येन कांग्रेसपक्षाय स्वाभाविकतया महान् अवसरः प्राप्तः। किन्तु तथापि कांग्रेसपक्षस्य अन्तः यथा संघर्षः भ्रमस्य च स्थिति दृष्टा, सा अत्यन्तं दुर्भाग्यपूर्णा अस्ति। सः अवदत् यत् राज्यसभास्थानार्थं कांग्रेसपक्षस्य अनेकाः वरिष्ठनेतारः देहलीं गत्वा स्वपक्षं प्रस्तुतवन्तः, अनेकान् नेतृन् मुख्यमन्त्रिणा पुनः पुनः एतत् आश्वासनं दत्तं यत् तेषां नाम विषये विचारः क्रियते। परन्तु अन्ते स्पष्टं जातम् यत् मुख्यमन्त्री स्वान् एव सहयोगिनः मित्राणि च भ्रमितवान्।

## 'आनन्दशर्मणा सार्वजनिक-रूपेण स्वपीडा व्यक्ता'

सः अवदत् यत् केचन नेतारः राज्यसभा-नामाङ्कनसम्बद्धाः औपचारिकप्रक्रियाः अपि पूर्णीकृतवन्तः, यतः तेषां प्रति एतत् विश्वासः प्रदत्तः यत् तेषां टिकट दास्यते। किन्तु अन्तिमक्षणे स्थिति परिवर्तिता, येन कांग्रेसपक्षस्य अन्तः महान् असन्तोषः उत्पन्नः। जयरामठाकुरः अवदत् यत् वरिष्ठकांग्रेसनेता आनन्दशर्मणा सार्वजनिकरूपेण स्वपीडा व्यक्ता, यत् अस्य प्रमाणं यत् कांग्रेसपक्षस्य अन्तः सम्मानस्य संवादस्य च भावना समाप्ता जाता। आनन्दशर्मा इव वरिष्ठः नेता स्वयम् उक्तवान् यत् सः जीवनपर्यन्तं आत्मसम्मानेन सह राजनीति कृतवान् तथा सत्यं वदनस्य मूल्यम् अपि भुक्तवान्।

## 'मित्रमण्डलं एव निर्णयान् करोति'

विपक्षनेता अवदत् यत् अद्य हिमाचलप्रदेशे सर्वकारः मन्त्रिमण्डलेन न अपि तु 'मित्रमण्डलेन' चाल्यते। सः अवदत् यत् निर्णयाः मन्त्रिमण्डलसभासु न अपि तु सीमितस्य मित्रमण्डलस्य मध्ये क्रियन्ते, यत्र एतत् निर्धार्यते यत् कस्मै लाभः दातव्यः तथा कः पार्श्वे स्थापनीयः। प्रदेशस्य नीतयः संसाधनानि च अस्य मित्रमण्डलस्य प्राथमिकतानां आधारेण एव संचालितानि भवन्ति।

## 'राज्यसभायाः अभ्यर्थिनः लगभग 230 कोटिरूप्यकाणां सम्पत्तिः'

जयरामठाकुरः अवदत् यत् राज्यसभायाः कृते कांग्रेसपक्षेण यं व्यक्तिं साधारणकार्यकर्ता इति उक्त्वा टिकट् दत्तम्, तस्य शपथपत्रे लगभग 230 कोटिरूप्यकाधिकस्य सम्पत्तिः उद्घाटिता। अधुना अस्मिन् सर्वकारे तस्य समीपे बहवः कोटिरूप्यकपरिमिताः संविदाः अपि सन्ति। सः अवदत् यत् कांग्रेसपक्षस्य एव अनेकाः नेतारः प्रश्नं कुर्वन्ति यत् यदि एषा साधारणकार्यकर्तुः परिभाषा अस्ति, तर्हि दीर्घकालं पक्षाय कार्यं कृतवन्तः अन्ये कार्यकर्तारः किमर्थं एतादृशं अवसरं न प्राप्नुवन्ति।

सः मुख्यमन्त्रिणः यतेक्रक्र विषये अपि प्रश्नान् उत्थापयन् अवदत् यत् बहुषु अवसरषु मुख्यमन्त्रिणः आधिकारिकयात्राकार्यक्रमः प्रकाशितः भवति, किन्तु अनन्तरं सः अन्यत्र उड्डच्छति, यस्य सूचना न प्रशासनाय न च जनतायाः भवति। संवैधानिकपदे स्थितस्य व्यक्तेः कृते एषा कार्यपद्धतिः गभीरान् प्रश्नान् उत्पद्यति।

## 'भाजपसर्वकारेण अभूतपूर्व-विकासकार्याणि कृतानि'

जयरामठाकुरः अवदत् यत् कांग्रेससर्वकारः निरन्तरं भाजपसर्वकारं प्रति आरोपान् करोति, किन्तु सत्यं एतत् यत् भाजपसर्वकारस्य पञ्चवर्षीयकार्यकाले प्रदेशे अभूतपूर्व-विकासकार्याणि अभवन्। सः अवदत् यत् तस्मिन् काले लगभग 7000 कोटिरूप्यकाधिकाः विकासपरियोजनाः प्रदेशाय प्राप्ताः। अपि च 4700 किलोमीटरपरिमिताः मार्गाः निर्मिताः। भाजपसर्वकारेण हिमकेयर योजना, सहारा योजना, मुख्यमन्त्री स्वावलम्बन योजना तथा जल जीवन मिशन इत्यादिभिः माध्यमैः जनतायै स्वास्थ्यसुरक्षा, आर्थिकसहायता तथा युवानां आत्मनिर्भरत्वस्य अवसरः प्रदत्तः।

## 'अद्य विकासकार्याणि स्थगितानि'

सः अवदत् यत् भाजपसर्वकारेण वृद्धानां कृते सामाजिकसुरक्षापेन्शनव्यवस्था दृढीकृता, जनमञ्चकार्यक्रमेण जनसमस्याः अपि समाधानं प्राप्तवन्ति। किन्तु अद्य प्रदेशे विकासकार्याणि स्थगितानि सन्ति, मार्गपरियोजनाः विरताः, पेयजलयोजनानां कार्यम् अपि न प्रवर्तते, तथा सर्वकारः केवलं पूर्वारब्धयोजनानाम् उद्घाटनमेव करोति।

# आयुष्मान भारत योजना, आरोग्य मंदिर योजना माध्यमेन समग्र राष्ट्रस्य ग्राम्य-क्षेत्रेषु स्वास्थ्यसेवानां विस्तारो विधीयते- प्रधानमन्त्री




**हिमसंस्कृतवार्ताः -** प्रधानमन्त्री नरेन्द्रमोदी प्रोदैरयत् यत् विगतेषु कतिपयेषु वर्षेषु भारतस्य स्वास्थ्य-संरचना दृढा संजातास्ति। वित्त-सङ्कल्पनायाः अनन्तरं आयोजितायां वेबिनार इत्याख्यायां सञ्जालीय-सङ्गोष्ठ्यां 'सबका साथ सबका विकास' इति विषये सम्बोधयता मोदिना प्रोदितं यत् जनानाम् आकांक्षाणां सम्पूर्णं केवलं चर्चायाः विषयः नास्ति, अपितु एषः विषयः वित्त-सङ्कल्पनायाः मूलाधारः सर्वकारस्य च प्रतिबद्धता अस्ति। अर्थव्यवस्थायाः विकासोदय-विषये श्रीमोदी सबलम् उक्तवान् यत् कर्तृणां वैश्विक-अभियाञ्यायां वृद्धि-कारणेन अपि राष्ट्रे लक्षाधिकेभ्यः युवजनेभ्यः कौशलाधारितानां जीविकानां नूतनाः अवसराः उत्पन्नाः भविष्यन्ति।

प्रधानमन्त्री उक्तवान् यत् विज्ञान-प्रौद्योगिकी-अभियांत्रिकी-गणित-क्षेत्रेषु महिलानां वृद्धिः वस्तुतः गौरवास्पदं वर्तते। श्रीमोदी इतोऽपि न्यगदत् यत् भविष्य-कालिक-प्रौद्योगिकीसु कन्याजनेभ्यः समानावसराणां सुनिश्चयनं कर्तुं शासनम् प्रतिबद्धम् अस्ति। प्रधानमन्त्री प्रतिपादितवान् यत् भारतं नवोन्मेष-प्रधानं अर्थव्यवसायं प्रति गच्छति। अमुना शैक्षणिक-संस्थाः समाकारिताः यत्ताः निज-परिसरान् केन्द्राणि च उद्योगसहयोगेन अनुसंधानाधारित-शिक्षाया-केन्द्रत्वेन परिवर्तयेयुः, येन छात्राः वास्तविक विश्वस्य अनुभवं कर्तुं प्रभवेयुः।

## '२५ वृक्षच्छेदनस्य अनुमतिः, किन्तु ३०० अधिकाः वृक्षाः छिन्नाः'

**विपक्षनेता अवदत् यत् कांग्रेससर्वकारस्य काले भ्रष्टाचारस्य** राजनैतिकसंरक्षणस्य च अनेकाः प्रकरणाः प्रकाशं प्राप्तवन्ति। सिरमौरजनपदस्य शिलाईक्षेत्रे अवैधवृक्षच्छेदनस्य उदाहरणं दत्त्वा सः अवदत् यत् यत्र केवलं २५ वृक्षच्छेदनस्य अनुमतिः आसीत्, तत्र ३०० अधिकाः वृक्षाः छिन्नाः। अस्मिन् विषये राजनैतिकसंरक्षणं दत्तम् इति आरोपः अपि कृतः।

## 'दोषिणां विरुद्धं कठोरकार्या भवेत्'

सः अवदत् यत् नियमाः अनुसारं निजीभूमौ अपि सीमितसंख्यायाः वृक्षच्छेदनस्य एव अनुमतिः भवति, किन्तु अत्र नियमाणां स्पष्टा अवहेलना जाता। यदि सरकारे नैतिकसाहसम् अस्ति तर्हि सम्बन्धितानां विरुद्धं कठोरकार्या करणीयम्।

मण्डीजनपदे अपि अन्यस्मिन् वनच्छेदनप्रकरणे सहस्रशः ट्रकपरिमिता काष्ठच्छेदनस्य आरोपाः सन्ति, प्रकरणं न्यायालये विचाराधीनम् अस्ति।

## १२० कोटिरूप्यकपरियोजनायाम् अनियमितताः-

सः अवदत् यत् अन्यस्मिन् परियोजनायां अपि लगभग १२० कोटिरूप्यकपरिमिते व्यये गभीराः वित्तीयानियमितताः दृश्यन्ते। अन्येषु राज्येषु समानक्षमतायाः परियोजनाः अल्पव्यये निर्मीयन्ते, किन्तु हिमाचले अत्यधिकव्ययः क्रियते, यः गभीरान् प्रश्नान् जनयति। अन्ते जयरामठाकुरः अवदत् यत् कांग्रेससर्वकारः त्रिवर्षपर्यन्तं केवलं आरोप-प्रत्यारोपस्य राजनीतिं करोति। यदि भाजपायाः पूर्वमन्त्रिणां विरुद्धं किञ्चित् ठोसप्रमाणं अस्ति तर्हि तेषां विरुद्धं कार्यवाही क्रियते। किन्तु दीर्घकालं यावत् केवलं वक्तव्यं दातुं राजनैतिकहताशायाः द्योतकं भवति।

सः अवदत् यत् प्रदेशस्य जनता सर्वं पश्यति तथा बोधयति यत् कांग्रेससर्वकारः विकासस्य स्थाने केवलं सत्तारक्षणस्य मित्रलाभस्य च राजनीतिं करोति।

# हिमाचलप्रदेशे ६८ नवीनाः पंचायताः निर्मातुं सिद्धता, २५० अनारक्षिताः भविष्यन्ति






**हिमसंस्कृतवार्ताः शिमला।** हिमाचलप्रदेशे ६८ नवीनाः पंचायताः निर्मातुं सिद्धता क्रियते। अयं निर्णयः विधायकेभ्यः प्राप्तानाम् आग्रहाणाम् अनन्तरं गृहीतः। मुख्यमन्त्री- कार्यालयात् अपि नवीनपंचायत- गठनस्य अनुमतिः प्रदत्ता। अधुना पंचायतीराज- विभागः प्रस्तावितानां पंचायतानां विषये आगामि- औपचारिकप्रक्रियाः पूर्णाः करिष्यति। नवीन- पंचायत- गठनस्य याञ्चा दीर्घकालात् उत्थापिता आसीत्। बहवः विधायकाः स्व स्व- विधानसभाक्षेत्रेषु पंचायतानां पुनर्गठनं तथा च नवीनपंचायत-निर्माणस्य प्रस्तावं सर्वकारस्य समक्षं प्रस्तुतवन्तः। तासां विचारानन्तरं सर्वकारेण ६८ नवीनाः पंचायताः निर्मातुं निर्णयः कृतः। अस्याः पूर्वं ४ नवीनाः पंचायताः निर्मिताः आसन्।तदनन्तरं सर्वकारेण ३९ नवीनपंचायत-गठनस्य अनुमतिः अपि प्रदत्ता। ८४ नवीनपंचायतानां विषये अपि सर्वकारेण जनतायाः आपत्तयः, परामर्शा आमन्त्रिताः सन्ति। अधुना ६८ अन्याः पंचायताः निर्मातुं निर्णयः कृतः, येन राज्ये पंचायतानां संख्या अधिका भविष्यति। नवीनपंचायत-गठनात् ग्रामीणक्षेत्रेषु प्रशासनिककार्याणि अधिकसुगमतया सम्पन्नानि भविष्यन्ति। जनाः स्वग्रामस्य समीपे एव पंचायतस्तरे बहूनां योजनानां तथा सुविधानां लाभं प्राप्स्यन्ति। तेन सह विकासकार्याणां निरीक्षणं तथा क्रियान्वयनम् अपि अधिकप्रभावितया सम्भविष्यति।अतिरिक्ततया राज्ये प्रायः २५० पंचायताः तादृश्यः सन्ति, यत्र गतद्वि- त्रि- कार्यकालयोः प्रधानपदं स्त्रीभ्यः अथवा विभिन्न- आरक्षित- वर्गेभ्यः आरक्षितम् आसीत्। राज्यसर्वकारेण प्रारम्भिक- सांख्यिक- संग्रहानन्तरम् एताः पंचायताः अनारक्षिताः कर्तुं निर्णयः कृतः। जनानां आवेदनानाम् अनन्तरं प्रदेशसर्वकारेण मन्त्रिमण्डलसभायाम् अस्य विषयस्य चर्चा कृता। आगामिपंचायत-निर्वाचने एतानि आरक्षणात् बहिः कर्तुं निर्णयः स्वीकृतः।
प्रदेशसर्वकारस्य समीपे ५० आवेदनानि अपि प्राप्तानि, येषु आसनानि अनारक्षितानि कर्तुं निवेदनं कृतम् अस्ति। ज्ञातव्यं यत् हिमाचलप्रदेशे शीघ्रमेव पंचायतनिर्वाचनानि भविष्यन्ति, तेषां कृते सरकारः तथा राज्य-निर्वाचन-आयोगः अपि सिद्धतां कुर्वन्ति। राज्य- निर्वाचन- आयोगेन पंचायतीराज- विभागाय २० मार्चपर्यन्तं नवीनपंचायत- गठनप्रक्रियां पूर्णां कर्तुं निर्देशः दत्तः।भारतीय- सर्वोच्च- न्यायालयस्य निर्देशानुसारं राज्ये ३१ मईपूर्वं पंचायत-निर्वाचनानि करणीयानि सन्ति। अतः आरक्षणं, रोस्टरनिर्धारणं सम्बन्धिविभागः शीघ्रतया प्रक्रियाः पूर्णाः कुर्यात् इति प्रयत्नं कुर्वन् अस्ति। सर्वकारस्य अयं निर्णयः पंचायतस्तरे प्रतिनिधित्वे संतुलनं स्थापयितुं महत्त्वपूर्णः कदमः इति मन्यते। अनेन निर्वाचनप्रक्रिया अधिका पारदर्शिता तथा सर्वेषां वर्गाणां कृते समान-अवसरयुक्ता भविष्यति।

### पंचायतानां कार्यकालं ध्यानं कृत्वा आरक्षण क्रम सूची- निर्मीयते

पंचायतीराजमन्त्री अनिरुद्धसिंहः उक्तवान् यत् प्रथमं पंचायतानां मूल्यांकनं कृतम्। ततः अनन्तरं अयं विषयः मन्त्रिमण्डले प्रस्तुतः। हिमाचलप्रदेशे प्रायः २५० पंचायताः तादृश्यः सन्ति, याः निरन्तरं द्विवारं आरक्षिताः आसन्। पंचायतानां कार्यकालं दृष्ट्वा आरक्षण क्रम सूचीः निर्मीयते।

# दलाईलामा अन्ताराष्ट्रीय- तिब्बत- समर्थन- समूहानां प्रतिनिधिभ्यः दत्तवान् विशेषदर्शनम्



**हिमसंस्कृतवार्ताः- धर्मशाला।** तिब्बती धर्मगुरुः १४-तमः दलाईलामा महोदयः सोमवासरे धर्मशालास्थित-स्वकीये निवासे त्रिदिवसीय- विशेष- अन्ताराष्ट्रीय- तिब्बत- समर्थन- समूहस्य उपवेशने आगतेभ्यः प्रतिनिधिभ्यः विशेषदर्शनं प्रदत्तवान्। अस्मिन् अवसरे विभिन्नदेशेभ्यः आगताः तिब्बत-समर्थकाः प्रतिनिधयश्च तं मिलित्वा तस्य आशीर्वादं प्राप्तवन्तः।
अस्मिन् कार्यक्रमे केन्द्रीय-तिब्बती-प्रशासनस्य कालोन (मन्त्री) नोर्जिन डोलमा, सचिवः कर्मा चोयिंग अन्ये च गणमान्याः उपस्थिताः आसन्। उपवेशने विश्वस्य अनेकदेशेभ्यः आगताः तिब्बत-समर्थक- समूहानां प्रतिनिधयः भागं गृहीतवन्तः। अस्मिन् अवसरे प्रतिनिधिभिः तिब्बतप्रकरणं वैश्विकस्तरे अधिकप्रभावेन प्रस्तौतुं, लोकतान्त्रिकदेशेषु जागरूकतां वर्धयितुं, भविष्यस्य रणनीतिविषयेषु च गम्भीरं विचार-विमर्शं कृतम्।

# विधानसभा-निर्वाचनेषु कः प्राप्स्यति काङ्ग्रेस-दलस्य 'नामपत्रम्'; मुख्यमन्त्री सुक्खूः कृतवान् रहस्योद्घाटनम्



**हिमसंस्कृतवार्ताः - शिमला।** काङ्ग्रेस-नेतृ- अनुरागशर्मणः राज्यसभा-सांसदत्वेन निर्वाचितस्य उपलक्ष्ये शिमला-नगरस्य 'राजीव-भवने' इति पक्ष-कार्यालये कार्यकर्तृ-सम्मान-समारोहः आयोजितः। अस्मिन् अवसरे मुख्यमन्त्री सुखविन्दरसिंहसुक्खूः अवदत् यत् अद्य कार्यकर्तॄणां कृते गर्वस्य हर्षस्य च दिनम् अस्ति, यतः सङ्घटनात् निर्गतः एकः साधारणः कार्यकर्ता राज्यसभा-सांसदः अभवत्। मुख्यमन्त्री अचकथत् यत् राज्यसभा-निर्वाचनाय काङ्ग्रेस-शीर्षनेतृत्वेन प्रदेशात् चतुर्णां जनपदाध्यक्षाणां नामानि आहूतानि आसन्, येषु वरिष्ठनेत्रा राहुलगान्धिना अनुरागशर्मा चितः। सः अवदत् यत् भाजपा-जनाः राज्यसभा-निर्वाचनं प्रति विविधाः वार्ताः कुर्वन्ति स्म, किन्तु काङ्ग्रेस-दले कस्यापि नेतुः किमपि वैमनस्यं नास्ति। अत एव अनुरागशर्मा निर्विरोधं निर्वाचितः। सः उपहासं कुर्वन् अवदत् यत् अधुना संसदि भाजपायाः 'अनुरागेण' सह काङ्ग्रेस-दलस्य 'अनुरागः' एव स्पर्धिष्यते।

### कार्यकर्तृभ्यः विधानसभा-निर्वाचनस्य संकेतम्

मुख्यमन्त्री अवदत् यत् राहुलगान्धिना एकस्मै सामान्याय कार्यकर्त्रे राज्यसभायाः अवसरं दत्त्वा स्पष्टः सङ्केतः दत्तः अस्ति यत् आगामि- विधानसभा-निर्वाचनेषु अपि सामान्यानां कार्यकर्तॄणाम्, एन.एस.यू.आई (NSUI) तथा सङ्घटनात् निर्गतानां नेतॄणां विषये गम्भीरतया विचारः करिष्यते। सः कार्यकर्तृभ्यः आह्वानं कृतवान् यत् ते आगामि-सङ्घर्षाणां कृते सज्जाः भवन्तु। सः अवदत् यत् वर्तमान-सर्वकारः जनहित-योजनाभिः सह अग्रे गच्छति।

### शिक्षा-स्वास्थ्य-क्षेत्रेषु परिष्काराः

> प्रदेशे CBSE आधारित-१५० विद्यालयानां उद्घाटनाय निर्णयः स्वीकृतः, ये दुर्गमक्षेत्रेषु अपि आरप्स्यन्ते। सहैव 'राजीव गान्धी डे-बोर्डिंग' विद्यालयाः अपि स्थाप्यन्ते। आगामिषु ५-६ वर्षेषु राज्यस्य शिक्षा-ढाञ्चा पूर्णतः परिवर्तिता भविष्यति।

> देहली-स्थित-'एम्स' (AIIMS) इव आधुनिक-तन्त्रांशः राज्यस्य चिकित्सालयेषु एकवर्षाभ्यन्तरे उपलब्धः भविष्यति। उच्चस्तरीय-यन्त्राणां (High-end machines) स्थापनेन रुग्णैः राज्ये एव विश्वस्तरीयाः सुविधाः प्राप्स्यन्ते।

### भाजपा-दलस्य उपरि वित्तीय-कुप्रबन्धनस्य आरोपः

मुख्यमन्त्रिणा आरोपः कृतः यत् हिमाचलस्य ९० प्रतिशतं जनाः ग्रामेषु वसन्ति, सर्वकारः च ग्रामीण-अर्थव्यवस्थां सुदृढां करोति। सः अचकथत् यत् पूर्वतन-भाजपा-सर्वकारेण राज्यस्य सम्पत्त्याः हानिः कृता। भाजपा-शासने राजस्व-हानि-अनुदानं (RDG) ५४ सहस्र-कोटि-रूप्यकाणि प्राप्तम् आसीत्, किन्तु वर्तमान-सर्वकाराय केवलं १७ सहस्र-कोटि-रूप्यकाणि एव मिलितानि, यत् चतुर्गुणितं न्यूनम् अस्ति।
सः अवदत् यत् भाजपायाः वित्तीय-कुप्रबन्धनस्य कारणेन राज्यकोषः रिक्तः जातः, तथापि वर्तमान-सर्वकारः कृषकेभ्यः न्यूनतम-समर्थन-मूल्यं (MSP) ददाति, अनाथबालकानां पोषणं करोति तथा कर्मचारिभ्यः महिलाभ्यः च अधिकारान् ददाति। सः पुनः आरोपं कृतवान् यत् भाजपा हिमाचलस्य हितानां विरुद्धं कार्यं करोति, यतः ते न तु आपदा-ग्रस्तानां साहाय्यं कृतवन्तः, न च आर.डी.जी. (RDG) प्रदाने राज्यस्य पक्षं समर्थितवन्तः।

# "लौकिकन्यायकोशः"

# "अविवेकपुरोहितन्यायः"

एकदा एक संपन्नः पुरुषः गृहं निर्मापितवान्। वास्तुशान्ते कृते योग्यं मुहूर्तं पश्यतु इति सः एकं पुरोहितं प्रार्थितवान् तदा तस्य पुरोहितस्य पुत्रः तत्र एव आसीत्। सः एतत् लक्षितवान् यत् तस्य गृहस्य द्वारं विशालं नास्ति इति। सः गृहस्य स्वामीनं कथितवान्- आर्य! गृहस्वामीन्याः शरीरं किञ्चित् स्थूलम् अस्ति। अतः द्वारं किञ्चित् विशालं कारयन्तु इति। तत् श्रुत्वैव पुरोहितः भणितवान्- अरे मूर्ख! तव किमर्थं तस्य चिन्ता? यदि कदाचित् गृहस्वामीनी द्वारे अवरुद्धा तर्हि तस्याः शरीरस्य खण्डानि कृत्वा अपि गृहद्वारं रिक्तं कर्तुं शक्यते इति। एतत् विचित्रं वचनं श्रुत्वा गृहस्वामिनः तस्य पत्न्याः च मनसि किं जातमिति वक्तव्यम् एव न।

**डा वर्षा प्रकाश टोणगांवकर**
**पुणे / महाराष्ट्रम्**



# शिमलां प्राप्तवान् नूतन-राज्यपालः कविन्द्रगुप्तः, मुख्यमन्त्री, विधानसभाध्यक्षः, विपक्षनेता च कृतवन्तः स्वागतम्



**हिमसंस्कृवार्ताः - शिमला।**
हिमाचलप्रदेशस्य नामित-राज्यपालः जम्मू-निवासी कविन्द्रगुप्तः स्वपत्न्या बिन्दुगुप्ता इत्यनया सह सोमवासरे सायंकाले शिमलास्थितं लोकभवनं प्राप्तवान्। मङ्गलवासरे प्रातः ११:४५ वादने मुख्यन्यायाधीशः तस्मै प्रदेशस्य ३०-तम-राज्यपालरूपेण शपथं कारयिष्यति। शपथग्रहणानन्तरं गुप्तमहोदयः औपचारिकरूपेण हिमाचलस्य राज्यपालपदं गृह्णीयात्। सोमवासरे शिमलायां मुख्यमन्त्री सुखविन्दरसिंहसुक्खूः मन्त्रिमण्डलस्य सदस्याश्च तस्य भव्यं स्वागतं कृतवन्तः।
माध्यमैः सह सम्भाषणकाले कविन्द्रगुप्तः अवदत् यत् सः हिमाचलप्रदेशस्य विकासाय जनकल्याणाय च सर्वान् वर्गान् सार्धं स्वीकृत्य कार्यं करिष्यति। सः उक्तवान् यत् सप्तमासाभ्यन्तरे एव एतादृशं महत्तरं दायित्वं प्राप्तुं तस्य कृते गौरवस्य विषयः अस्ति। सः एतद् पदं सम्मानजनकं सङ्घर्षपूर्णं च मत्वा निष्ठापूर्वकं निर्वक्ष्यति। सः महत्तरदायित्वप्रदानाय राष्ट्रपतिं द्रौपदी मुर्मू महोदयां प्रधानमन्त्रिणं नरेन्द्रमोदिनं च प्रति कृतज्ञतां प्रकटितवान्।

## जम्मू-कश्मीरस्य विधानसभाध्यक्षः, उप-मुख्यमन्त्री च आसीत्

हिमाचलस्य नूतन-राज्यपालः कविन्द्रगुप्तः सोमवासरे शिमलां प्राप्तवान्। तस्य जन्म २ दिसम्बर १९५९ दिनाङ्के जम्मु-नगरे अभवत्। सः चतसृभ्यः दशकेभ्यः अपि अधिककालं यावत् सार्वजनिकजीवने प्रशासने च अनुभवी जननेता अस्ति। तस्य पिता केन्द्रसर्वकारस्य डाकविभागे कार्यरतः आसीत्, अतः तस्य प्रारम्भिकशिक्षा पञ्जाबस्य सङ्गरूर-फिरोजपुर-गुरुदासपुर-नगरेषु अभवत्। १९७९ तमे वर्षे सः गुरुदासपुर-राजकीय-महाविद्यालयात् स्नातकपदवीं प्राप्तवान्।
१९७० तमे दशके कविन्द्रगुप्तः राष्ट्रियस्वयंसेवकसङ्घेन (RSS) सह सम्बद्धः अभवत्। आपत्कालसमये (१९७५-१९७७) सः वरिष्ठनेतृभिः सह गुरुदासपुर-पटियाला-कारागारेषु बन्दी आसीत्।

### राजनैतिक-प्रशासनिक-यात्रायाः प्रमुखाः बिन्दवः

१. १९७८-७९: अखिलभारतीयविद्यार्थीपरिषदः (ABVP) पञ्जाब-घटकस्य सचिवः।
२. १९८८: भारतीयजनतायुवामोर्चा-जम्मु-कश्मीरस्य जनपदाध्यक्षः।
३. १९९३-९८: युवामोर्चा-जम्मु-कश्मीरस्य प्रदेशाध्यक्षः।
४. जम्मु-नगरनिगमस्य प्रथमः 'महापौरः' (Mayor) निर्वाचितः, निरन्तरं त्रिकार्यकालं यावत् सेवां कृतवान्।
५. २०१४: गान्धीनगर-विधानसभाक्षेत्रात् भाजपा-विधायकरूपेण निर्वाचितः।
६. २०१५: जम्मु-कश्मीर-विधानसभायाः अध्यक्षः जातः, एतद् पदं प्राप्तवान् प्रथमः भाजपा-नेता।
७. २०१८: जम्मु-कश्मीरस्य उप-मुख्यमन्त्री नियुक्तः।
८. १४ जुलाई २०२५: लद्दाख-राज्यस्य उप-राज्यपालः नियुक्तः।
९. ५ मार्च २०२६: हिमाचलप्रदेशस्य राज्यपालत्वेन तस्य नियुक्तिः अभवत्।

# कुमारभास्करवर्मसंस्कृतपुरातनाध्ययन-विश्वविद्यालये नूतने "सम-उपाचार्या" पदे आचार्यमल्लिकाकलितायाः नियुक्तिः सर्वैः विभागैः अभिनन्दनम्"



**हिमसंस्कृतवार्ता डॉ.निशिकान्तपाण्डेयः नलबारी (असमः)।** असम-प्रदेशस्य प्रख्याते कुमारभास्करवर्मसंस्कृतपुरातनाध्ययविश्वविद्यालये अद्य हर्षोल्लासस्य वातावरणं दृश्यते। विश्वविद्यालयस्य प्रशासनेन वरिष्ठ-आचार्या मल्लिका कलिता महोदया नूतन-सम-उपाचार्या (Rector) इति महत्त्वपूर्णे पदे नियुक्ता। इयं नियुक्तिः विश्वविद्यालयस्य इतिहासे महिलानेतृत्वस्य सुदृढं सोपानं मन्यते।
विशेषतः ८ मार्च दिनाङ्के 'अन्ताष्ट्रिय-महिला-दिवसस्य' पावन-अवसरे अनया घोषणया शैक्षणिक-क्षेत्रे नारी-शक्तेः उत्कर्षः प्रकटितः। विश्वविद्यालयस्य सभाङ्गणे आयोजिते गरिमामये अभिनन्दनसमारोहे कुलपति-महोदयैः सह सर्वेषां विभागानां प्रमुखाः उपस्थिताः आसन्। तत्र कुलपतिभिः प्रह्लाद रा जोशीमहोदयैः स्वभाषणेन सम-उपाचार्यमहोदयायै हार्दानि अभिनन्दनानि प्रदत्तानि। तेनोक्तं यत् एषः विश्वविद्यालयस्य कृते अतीव गौरवपूर्णः विषयः अस्ति तथा च सर्वे अपि अत्यन्तं हर्षिताः आनन्दिताश्च सन्ति।
समारोहे विश्वविद्यालयस्य विविधानां विभागानां पक्षतः आचार्य-मल्लिका-कलितायाः भव्यं स्वागतं कृतम्। संस्कृतसर्वदर्शनविभागः, वेदाध्ययनविभागः, साहित्यविभागः, व्याकरणविभागः, धर्मशास्त्रविभागः, न्यायविभागः, शिक्षाविभागः, असमीयाविभागः, तथा योगविज्ञानविभागः इत्यादिभिः विभागैः स्व-स्व-प्रतिनिधिभिः साकं महोदयायै पुष्पगुच्छम्, अङ्गवस्त्रं च दत्वा अभिनन्दनानि व्याहृतानि।सर्वे विभागाध्यक्षाः तस्याः दीर्घकालिक-शैक्षणिक-अनुभवस्य तथा पाण्डित्यस्य प्रशंसां कृतवन्तः। अस्मिन् अवसरे नवनियुक्ता सम-उपाचार्या अवदत् यत्—"विश्वविद्यालयस्य सर्वाङ्गीण-विकासाय, छात्राणाम् उज्ज्वल-भविष्याय तथा शिक्षायाः वैश्विके स्तरे प्रचाराय अहं पूर्णनिष्ठया कार्यं करिष्यामि। सर्वेषां विभागानां सहयोगेन वयं विश्वविद्यालयं नूतन-शिखरं नेष्यामः।"
अनया नियुक्त्या विश्वविद्यालयस्य शैक्षणिक-प्रशासनिक-कार्याणि नवीनां गतिम् ऊर्जां च प्राप्स्यन्ति इति विश्वासः प्रकटितः। अन्ते सर्वे छात्राः शोधच्छात्राः च महोदयां मिलित्वा स्व-शुभकामनाः प्रकटितवन्तः।

# संस्कृतं मधुरं सदा -05

अशान्तेः मुख्यकारणमिति विषये किञ्चिदत्र चर्च्यते। अशान्तेः मुख्यकारणन्तु क्लेशः एव। योगदर्शनानुसारं मनुष्यजीवनस्य आभ्यन्तरिकाः क्लेशाः पञ्चविधाः भवन्ति, ते- अविद्या, अस्मिता, रागः, द्वेषः, अभिनिवेशः चेति। एते क्लेशाः हि मनुष्यं संसारचक्रे भ्रामयन्ति, ये च महादुःखदायकाः स्युः।
**अविद्या-** अनित्य- अपवित्र- दुःख- अनात्मेषु वस्तुषु नित्य- पवित्र- सुख- आत्मभावानाम् अनुभूतिः हि अविद्या कथ्यते। तस्माद् अविद्या जीवने दुःखस्य कारणं भवति।
**अस्मिता-** दृक्-शक्तिः, दर्शनशक्तिः इत्येतद् द्वयमपि सर्वथा भिन्नं, विलक्षणञ्च। द्रष्टा चेतनरूपः, बुद्धिः च जडरूपा। अनयोः एकता न कदापि सम्भवति। परन्तु अविद्याकारणतः द्वयोः स्वरूपम् एकरूपमेव परिलक्ष्यते। तस्माद् अस्मिता एका जीवनस्य क्लेशरूपा स्यात्।
**रागः-** सुखप्रतीतेः अनुकर्ता हि रागः। एतस्य कारणतो हि मनुष्यः सुखार्थं विषयान् प्रति आकृष्टः भवति। परन्तु न कोऽपि इन्द्रियविषयः सुखं प्रदातुमर्हति।
**द्वेषः-** दुःखप्रतीतेः अनुकर्ता द्वेषः आख्यायते। प्रतिकूलपदार्थेषु दुःखस्य प्रतीतिः भवति, यच्च क्लेशकारकम्।
**अभिनिवेशः-** मरणरूपः क्लेशः पारम्परिकः। जगति प्राणी सदैव स्वकीयां विद्यमानतां हि इच्छति। न कोऽपि मृत्युमिच्छति। एतन्मरणरूपं भयं जीवस्य अन्तःकरणे सुदृढतया तिष्ठति। अतोऽयं जीवस्य अन्यतमः, गभीरतमः च क्लेशः।
एते पञ्चक्लेशाः हि जीवस्य अशान्तेर्मूलकारणं सन्तीति, शम्।

✍ असमप्रदेशीयः विज्ञानशिक्षकः, नारदोपाध्यायः

# वार्ता-संवादः

**हिमसंस्कृतवार्ताः, ईदरधीरजः,हैदराबादः**

**नन्दिनी-** नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं करोमि। नमस्ते काव्ये।
**काव्या-** नमस्ते नन्दिनि। अद्य एका भयङ्कर-वार्ता मया श्रुता। रिहाना-नामिकायाः प्रसिद्धायाः गायिकायाः गृहे एकया महिलया आग्नेयास्त्रेण प्रहारः कृतः। सा अपराधिनी आरक्षकैः बद्धा अस्ति।
**नन्दिनी-** अहो, एतत् अतीव भयङ्करम्! सा सुरक्षिता अस्ति इति मया श्रुतम्। इदानीं मुम्बापुर्यां एका वार्ता। तत्र द्वाभ्यां तन्त्रज्ञाभ्याम् लघु-गृहस्य भाटक-रूपेण प्रतिमासं लक्ष-रूप्यकाणि दीयन्ते। अनेन जनेषु महान् कोलाहलः जातः।
**काव्या-** सत्यम्! मुम्बापुर्यां जीवनम् अतीव महार्घं जातम्। अनन्तरं, एकेन भारतीयेन पर्यटकेन वियतनामदेशस्य विषये उक्तम्। तेन उत्तमभवनेभ्यः स्वच्छाः मार्गाः एव श्रेष्ठाः इति विचारः प्रकटितः।
**नन्दिनी-** निश्चयेन, स्वच्छता एव जनानां मनः आकर्षति। अन्ते एका हास्यकरी वार्ता। नवदेहल्याम् एकस्मिन् कार्यालये एका नवप्रशिक्षार्थी प्रथमदिने एव अधिकृतैः निष्कासिता।
**काव्या-** सा प्रथमदिने एव निष्कासिता इति अतीव चित्रम्! ओहो, मया सर्वं ज्ञातम्! सा नव-प्रशिक्षार्थी कार्य-समयात् परम् अपि कार्यं कर्तुं पृष्टा अस्ति। किन्तु "अहं विलम्बेन कार्यं कर्तुं न इच्छामि" इति तया विरोधः कृतः। अतः सा निष्कासिता।
**नन्दिनी-** अहो आश्चर्यम्! कार्यक्रमः अत्रैव समाप्तः।